देशभेदे परम्परागताः तत्तत्स्मृतिषूक्ता वेद्याः । ब० । आचारहीने त्रि० ।

**अनाम्नात** त्रि० न आम्नातः । सम्यग्ज्ञानाविषयीभूते "आम्नातं यदानाम्नातं यज्ञस्य क्रियते मिथ" इति यजु० ।

**अनातप** पु० आ+तप–अच् न०त० । आतपस्य रौद्रस्याभावे, छायायां च । अनातपविशोषितमिति" वैद्यकम् छायाशुष्कमिति तदर्थः । ब० । आतपशून्ये त्रि० ।

**अनातुर** त्रि० न आतुरः । आतुरभिन्ने स्वस्थे अरोगे च "यद्देवाः शर्म्म शरणं यद्भद्रं यदनातुरमिति" ऋ० ८,४७,१०, 'भेजे धर्ममनातुर" इति रघुः ।

**अनात्मक** त्रि० नास्ति आत्मा स्थिरः यत्र कप् । क्षणिक विज्ञानमते, स्थिरात्मशून्ये जगति च । नैरात्म्यवादे हि चेतयिता स्थिर आत्मा न स्वीक्रियते किन्तु क्षणिकविज्ञानेनैव सर्वव्यवहारसिद्धिरित्यतः पराभिमतात्मशून्यत्वम् जगतः । विस्तरः क्षणिकविज्ञानशब्दे द्रष्टव्यः ।

**अनात्मज्ञ** त्रि० आत्मानं यथास्वरूपं न जानाति ज्ञा–क अस०स० । आत्मस्वरूपानभिज्ञे आत्मचेष्टितानभिज्ञे स्वपरविवेचनाशून्ये च ।

**अनात्मन्** पु० न आत्मा अप्राशस्त्ये भेदार्थे च न०त० । "अप्राप्तः प्राप्यते योऽयमत्यन्तं त्यज्यतेऽथवा । जानीयात्तमनात्मानं बुद्ध्यन्तं वपुरादिकम्" इत्येवं प्रतिपादिते आत्मभिन्ने अपकृष्टात्मनि देहादौ 'अनात्मनि देहादौ आत्मेति या बुद्धिः साऽविद्येति वे०प्र० । 'देवाश्च असुराश्च उभयएवानात्मान" इति श्रुतिः "अनात्मन्यात्मबुद्धिर्या साऽविद्या परिकीर्त्तितेति" पुरा० ।

**अनात्मवत्** त्रि० आत्माऽन्तःकरणं वश्यत्वेनास्त्यस्य मतुप् मस्य वः न०त० । अजितेन्द्रिये । "अनात्मवन्तःपशुवद्भुञ्जते येऽप्रमाणत" इति सुश्रुतम् ।

**अनात्म्य** न० आत्मन इदं आत्मन्+यत् आत्म्यम् शरीरं न०ब० । अशरीरे "एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्ते इति तै०आ० 'अनात्म्ये अशरीरे" इति भा० ।

**अनाथ** त्रि० नास्ति नाथः प्रभुरस्य । प्रभुहीने "किं भ्राता सद्यदनाथमिति" ऋ० १०,१०,११,। विलपन्तमनाथवदिति भार० ।

**अनादर** पु० आदरः गौरवहेतुका सम्माननाविरोधे न० त० । परिभवे, तिरस्कारे, अवज्ञायाम् च तेषामादरविरोधित्वात्तथात्वम् । "गुणेषु रागो व्यसनेष्वनादरः" नीति० । ब० । आदरशून्ये त्रि० ।

**अनादि** पु० आदिः कारणम् पूर्व्वकालो वा स नास्ति यस्य परमेश्वरे । नास्ति आदिः प्राथमिकोयस्मात् ५ब० । हिरण्यगर्भे पु० तस्य च "हिरण्यगर्भः समवर्त्तताग्रे" इति श्रुतौ स्रष्टुः प्रथमोत्पन्नत्वात्तथात्वम् । आदिशून्ये त्रि० । "जगदादिरनादिस्त्वमिति" कुमा० । "अनादिनिधनं ब्रह्म शब्दतत्त्वं प्रचक्षते" इति हरिः । "अनादिनिधना देवी वागुत्सृष्टा स्वयम्भुवेति" पुरा० । "अनादिर्भूर्भुव इति" विष्णु स० । "अनादित्वात् निर्गुणत्वादिति" गीता ।

**अनादिमत्** आदिमत् कार्य्यं तद्भिन्नः । कार्य्यभिन्ने ।

**अनादिष्ट** त्रि० न आदिष्टः विशेषरूपेण उपदिष्टः । विशेषरूपेणाकथिते "अस्य पापस्य, इदं प्रायश्चित्त" मित्यादिरूपेण विशेषतोऽनिर्दिष्टे प्रायश्चित्ते "उपपातकयुक्तानामनादिष्टेषु चैव हि । प्रकाशे च रहस्ये च" इति विश्वामित्रः ।

**अनादृत** न० आदृतम् आदरः भावे क्त अभावार्थे न०त० । आदराभावे अवज्ञायाम् । कर्म्मणि क्त न०त० । आदृतभिन्ने अवज्ञाते तिरस्कृते च त्रि० ।

**अनादेय** न० न आदेयः । स्मृत्यादिषु निषिद्धतया आदानानर्हे वस्तुनि "अनादेयस्य चादानादादेयस्य च वर्जनादिति" मनुः । अप्रतिग्राह्यं च अप्रतिग्राह्यद्रव्याणि च अप्रतिग्राह्यशब्दे वक्ष्यन्ते । ["मन्त्रानादेशे गायत्रीति" स्मृतिः ।

**अनादेश** पु० न आदेशः अभावे न०त० । उपदेशाभावे ।

**अनाद्य** त्रि० न आद्यं भक्ष्यम् । अभक्ष्ये स्मृतिनिषिद्धतया भक्षणानर्हे । "एषोऽनाद्यादनस्योक्तो व्रतानां विविधो-विधिरिति" "ज्ञानाज्ञानकृतं कृत्स्नं शृणुतानाद्यभक्षणे" इति च मनुः । अनाद्यानि च अभक्ष्यशब्दे दर्शयिष्यन्ते । आद्यशून्ये अनादौ त्रि० ।

**अनाधार** त्रि० नास्ति आधारो यस्य । आश्रयशून्ये "अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते" (भाषा०) उक्तेः न्यायमते नित्यद्रव्यमात्रे, आश्रयशून्यत्वाच्च युक्तमनाधारत्वम् "अम्बरान्तधृते"रित्यादि शा० सूत्रेण अम्बरपर्य्यन्तानां सर्वेषामाधारत्वमीश्वरस्येति नाम्बरादौ अनाधारत्वं किन्तु ब्रह्मण एवेति वेदान्तिनः ।

**अनाधृष्** त्रि० आ+धृष–क्त न०त० । अनभिभूते आधर्षणरहिते 'रेवतीरनाधृषः सिषासव" इति अथ० ६,२,२ ।

**अनाधृष्ट** त्रि० न आधृष्टः पराभूतः । अपरिभूते "मही न आयसनाधृष्ट" इति ऋ० ७,१५, १४, । वार्य्यमनाधृष्टं रक्षस्विना, ऋ० ८,२२,१८ ।